प्रोहोर्द्ध्वं कक्षयोरन्तरं ततः । इति प्रदेशा गदिता गजानां गात्रगोचराः। कण्ठस्यान्तर्मणिः पूर्वं ग्रीवापर्व समाश्रयः । उरोमणिः समाम्नातस्ततः स्यादुरसः स्थितिः। याऽधोभा पार्श्वगा तत्र गात्रसन्धिसमाश्रिता । आवर्त्तमणिरप्यत्र विज्ञो भास्वरसङ्गतः। ततः सन्धिकरस्तु स्यात्तस्याधः स्तनयोः पुरः । मात्रयोरन्तरं चापि चतुरस्रान्तरं भवेत् । अधःस्तनौ च स्तनयोरन्तरे चाथ चूचुके । स्तनान्तौ स्तनकूर्च्चौ च चोरिकौ चापि कूर्चके । चतुरस्रान्तरालं च भवेच्चूचुकयोरधः । स्तनयोरप्यधस्ताच्च पुरस्तात् स्तनयोर्भवेत् । हृदयं चास्य पार्श्वस्थावायामौ च बहिस्तयोः । स्यातामायामकाण्डौ च तदधोविवशौ ततः । ततः क्रोड़ं पदाधस्तात् पश्चाच्चायामकाण्डयोः । रन्ध्रे चापरवस्तिश्च स्तनयोरप्यनन्तरम् । जठरे नाभिरित्येते प्रदेशाः किल वक्षसः । आपराङ्घ्रिपरःशेफोरेतःस्रावावधिः स्मृतः । ततोऽण्डकोषसन्धिः स्यात् कोषसन्धिश्च शेफतः । क्रमान्मेहनमत्र स्यात् मेढ्रसंज्ञो भवेदपि । आनिर्गमात्तथा तस्य बाहुपार्श्वगतौ मतौ । अग्रतस्तत्र ककुदं तस्याश्री पार्श्वयोरपि । मेहनस्य पुरःस्रोतो वङ्क्षणौ कोषपार्श्वगौ । अपराश्रयिणी शुक्रे तथा वङ्क्षणमध्यगे । इत्यण्डकोषभागाः स्युः क्रमादासनमुच्यते । तदन्तश्चासनञ्चोर्द्ध्वं वक्रवंशस्य पृष्ठतः । भवेदपरवंशश्च ततोन्यच्चाध आसनम् । पश्चिमासनमप्यस्य पृष्ठतः परगस्य च । अत आस्तिप्रदेशस्य ततो वंशश्च बालधिः । (आस्तिरासनम्) । आश्रयेत्यभिधानाश्च भागाः पश्चान्निषादिनः । स्यातां च तत्पत्राधस्तात् पक्षसन्धी तथा ततः । स्याताञ्च पक्षपार्श्वे च गर्भूकाश्च क्रमादपि । पक्षाधोनन्तरौ चानुकुक्षी पक्षसमास्तृतौ । निष्काभौ मध्यगौ तत्र शङ्कू चैवोर्द्ध्वमध्यतः । कक्षाभोगौ काकपक्षौ शङ्कुच्छायाकरौ ततः । उत्कृष्टौ कुक्षिपश्चाच्च त्र्यस्थिपार्श्वगतावपि । कालकोत्कृष्टदेशानां पात्रवंशस्य पार्श्वयोः । कालके पिण्डिके चाधो विद्याच्चापरयोः स्थिते । उत्कृष्टपिण्डिका त्र्यस्थिस्थानमेवालम्बनम् । जघनं परतोऽस्माच्च एवं कालवका दश । भवेत् पायुश्च पायोस्तु गुदमभ्यन्तरं तथा । बहिर्गुदस्य वर्त्म स्यात् गुदान्तः कन्दरं विदुः । विलपाय्वन्तरे कक्षौ तथा पिण्डिकयोरपि । अधस्तादन्तरे किंविन्यन्तरे तस्य संस्थितिः । पिण्डिकाधश्च मण्डूक्यावष्ठीलौ पिण्डिकान्तरे"। अवयवप्रमाणभेदास्तत्रैव । "पिण्डिकारत्निकामाना गुल्फरोऽपि भवेत्तथा । कर्णसन्धिर्भवेच्चापि तच्चारत्निप्रमाणतः । कर्णापवर्त्तौ पाल्यौ च स्यातां हस्तसमुच्छ्रितौ । कर्णाश्री च तथा विद्याद्विस्तारे द्वादशाङ्गुले । कर्णाश्रावपि हस्तौ द्वावायामपरिणाहतः । कर्णवर्त्तिं विद्धि कर्णप्रमाणेन च रत्निकाम् । शिर आसनमुद्दिष्टं मानेन त्रिकहस्तकम् । शिरसस्तु प्रमाणेन स्यात् षड़ङ्गुलमासनात् । आसनेन समं शीर्षं कल्याणकरमित्यपि । यस्यासनं च नीचेन शिरसः स्यात् षड़ङ्गुलम् । अवाग्यो नाम स प्रोक्तो गजोनिन्दितलक्षणः । शिरो यस्य भवेदुच्चमासनाद् द्वादशाङ्गुलम् । सोऽभ्युदग्राभिधानेन लक्षणादासनं भवेत् । आसनं वङ्क्षणोद्देशाद् ग्राहस्य पक्षभागतः । मञ्जुसमानफलक उत्कृष्टोऽष्ठोस्थितोऽपि च । अष्टीत्येवं समाख्यातं लक्षणादासनं भवेत् । हस्तद्वयप्रमाणेन पेचकात् पश्चिमासनम् । द्वादशाङ्गुलनिम्नं स्यादासनात् पश्चिमासनम् । सार्द्धहस्तत्रयं चाधः प्रमाणमपि बालधेः । सप्ताङ्गुलप्रमाणेन पायुश्च परिमण्डलः । अरत्निपरिमाणेन विदुस्तद्वद्गुणान्तरम् । अरत्नितोऽधिकं यस्य विस्तारेण स्तनान्तरम् । तिर्य्यग्रोमचयं गात्रमरिभ्यः शोकदोगजः । अरत्नित्रयमानेन नाभिदेशस्तनान्तरम् । नाभिश्च मूत्रकोषश्च गुदारत्न्यर्द्धमानतः । अण्डकोषश्च हस्तार्द्धप्रमाणेन समन्वितः । द्वे चारत्नी तथार्द्धं च कोषमानं भवेदपि । सोऽर्द्धहस्तद्वयायामोहस्तानाहयुतोमतः । प्रौहे तु परिणाहः स्यादरत्निद्वितयं तथा । हस्तयोश्चार्द्धमानं स्यात् चतुर्भागेण संयुतम् । तलस्य पार्श्वतः प्रौहावरत्निप्रमितौ मतौ । चतुर्भागयुतारत्निर्भवेन्मस्तलोपरि । अष्टाङ्गुलप्रमाणेन स्यातां ततः पुरोनखौ । सप्ताङ्गुलश्चापनखः पार्श्वे पञ्चाङ्गुलानखाः। चतुर्विंशत्यङ्गुलञ्च भवेद्गात्रापरे तथा। अपराभ्यां भवेद्ग्रन्थिररत्न्यर्द्धेन मानतः। अरत्निश्च तलायामोभवेच्च करयोरपि । सप्ताङ्गुलास्तु वैशेषाः पाल्योः पार्श्वनखास्तथा । पञ्चाङ्गुलास्त्र्यङ्गुलाश्च नवचापि नखा मताः । इत्यङ्गमानं नागस्य दिङ्मात्रमिह दर्शितम् । समाङ्गा अपि मातङ्गा दृश्यन्ते दुःखदाः क्वचित् । दृश्यन्ते विषमाङ्गाश्च क्वचित् कल्याणदायिनः । तस्मात् प्रमाणं केषाञ्चिदप्रमाणतया मतम् । प्रमाणं कृतमाचार्य्यैः सर्व्वलक्षणवेदिभिः । अथाङ्गसङ्गमात्तावत् मातङ्गानां गुणागुणाः । भूयोऽन्यगुणदोषाभ्यां प्रसङ्गात् कथिताः पुनः । उपरिक्रमतो दृष्टो नातिस्तब्धोन्नदुस्थितिः। दृढस्निग्धाच्छरोमा च लोहिताङ्गुलिपुष्करः । सर्व्वव्यक्तप्रमाणश्च गजः कल्याणकारकः । भाग्यप्रदो बालहस्तस्तथायततनूरुहः । अर्थदो हीनबिन्दुश्च गजो दुःख-